# अभेदैकत्वसंख्याविचारः

**Dr. G.S.V. Dattatreya Murthy**
Assistant professor in Vyakarana
Department of Sanskrit & IC,
SCSVMV (Deemed to be ) Univeresity
Enathur, Kanchipuram - 631561

- **प्रधानांशाः**

1.अभेदैकत्वसंख्यापदार्थः

- 2.राजपुरुषः इत्यादौ वृत्तौ उपसर्जनपदार्थे संख्याभानं कुतो नेति विचारणा
- 3.अभेदैकत्वसङ्ख्या वृत्तौ भासते इति सिद्धान्तप्रतिपादनम्
- 4.कपिञ्जलाधिकरणप्रस्तावः
- 5.कपिञ्जलाधिकरणसारः
- 6.तत्र सङ्ख्याविशेषाणामविभागेनावस्थानमिति[1] प्रथमः पक्षः
- 7.परित्यक्तविशेषं सङ्ख्यासामान्यमिति द्वितीयः पक्षः
- 8.सङ्ख्याप्रतीतिरेव नेति तृतीयः पक्षः
- 9.संख्याविशेषानवगतिरेव अभेदैकत्वसंख्या इति सिद्धान्तः

**अभेदैकत्वसंख्येत्यस्यार्थः**

राज्ञः पुरुषः इति विग्रहवाक्ये राज्ञः, पुरुषः इति पदद्वयं वर्तते। उभयत्रापि सुबादीनां श्रूयमाणत्वेन लिङ्गसंख्यादयो भासन्ते। राजपुरुष इति वृत्तौ तु समुदायाद्विभक्तेः सत्वेपि उपसर्जनपदे राज्ञि विभक्तेरभावात् संख्याविशेषाणां प्रतीतिर्भवति न वेति सन्देह उदेति। प्रतीयते इति वक्तुं न शक्यते, तत्र विभक्तेरभावात्, न भवतीति वक्तुमपि न युज्यते, लिङ्गसंख्यान्वययोग्यत्वात्। अत्र भासमाना संख्यैवाभेदैकत्वसंख्येति भर्तृहरेरभिप्रायः। अस्याःअभेदैकत्वसंख्यायाः = विगलितभेदसंख्या व्यवहारः इत्यपि व्यवहारः वरीवर्ति। (वृत्तौ उपसर्जनपदार्थानां संख्यायोगः आवश्यकः, सत्वभूतत्वात्। लिङ्गसंख्यान्वयित्वं हि सत्वभूतत्वमुच्यते। न हि अव्ययवन्निसंख्यएवोपसर्जनपदार्थो युक्तः, सत्वमात्रस्य=द्रव्यमात्रस्य संख्यारहितस्यासंप्रत्ययात्। अयञ्चानुमानप्रयोगः-वृत्तौ उपसर्जनपदार्थः, संख्यासामान्यवान्, सत्वभूतत्वात्, यन्नैवं तन्नेवं यथाव्ययमिति। द्वित्वादिविरोधिहि एकत्वं द्वित्वादिनिरसनान्न समस्तसंख्या विशेषस्वीकारे समर्थनम्। इदन्त्वभेदैकत्वं सर्वसंख्याविशेषानुयायि। अत्र हि सर्वे संख्याविशेषाः संसर्गमविभागमनुप्राप्ता विद्यन्ते। तथा च निमित्ते सति ते

ततः=संख्याविशेषाः संख्यासामान्यात् आविर्भवन्तः दृश्यन्ते जलप्रसेकादिव ग्रीष्मे तपनोष्मतप्ताया भुवो गन्धादिविशेषाः। तस्मात् पार्षिक-तावकीन-मासजातादौ संख्याविशेषनिश्चयः भवति।)अत्र एवं पक्षा वर्तन्ते-

**अभेदैकत्वसंख्येत्यस्यार्थः**

अभेदेन एकत्वसंख्या अभेदैकत्वसंख्येति तृतीयासमासः। अभेदेन=अविभागेन, एकत्वसंख्या=एकत्वादिसंख्या, संख्यात्वेन रूपेण भासते इत्यर्थः। अभेदैकत्वसंख्यायाः वृत्तौ भानमेवं निरूपितं गुरुणा भर्तृहरिणा-

**अभेदैकत्वसंख्या वा तत्रान्यैवुजायते।**

**संसर्गरूपं संख्यानमविभक्तं तदुच्यते।।**

(वाक्यपदीयम्-3.वृत्तिसमुद्देशः-99, वा शब्दः अनास्थायाम्। वृत्तौ विशेषणानां राजादीनां सत्वभूतत्वात् संख्यायोगावश्यकत्वेन एकार्थीभावबलात् कारणीभूतपृथगर्थोपपस्थापकपदज्ञानाभावात् विशेषसंख्याभानेन च सामान्यसंख्यारूपं सर्वसंख्याविशेषाणां संसर्गरूपं तदित्येत्प्रकृतकारिकार्थः। )

वृत्तौ उपसर्जनपदार्थस्य सत्वभूतत्वेन, सत्वस्य लिङ्गसंख्यादियोग्यस्यावश्यकत्वेन निःसंख्येति वक्तुं न शक्यते। विशेषणैकत्व, द्वित्व, बहुत्वादिसंख्याः भासन्त इत्यपि वक्तुं न पार्यते। तत्तद्वचनबोधकविभक्तीनामभावात्। एवञ्च उपसर्जनपदार्थे संख्या भासत इति, न भासत इति इत्यपि वा वक्तुं न शक्यते। अतो अभेदैकत्वसंख्याप्रतीयत इति प्रतिपादितम्। भेदो नाम एकद्व्यादिसंख्यानां परस्परविरोधः। सः यस्यां नास्ति, यस्यां संख्यायां द्वित्वादयः स्वविरोधं परित्यज्य वर्तन्ते सा संख्येत्यर्थः। अभेदः=भेदाभावः, अभेदेन=अविभागेन, एकत्वसंख्या=एकत्वादिसंख्या इति। तेन एकत्व, द्वित्वादिसंख्यानामविभागेन भानमित्यर्थो लभ्यते। तथा च उपसर्जनपदार्थः संख्यासामान्यवत्वेन प्रतीयते। संख्यावान् उपसर्जनपदार्थः।

वस्तुतस्तु आलोच्यमाने अभेदसंख्येत्येव व्यवहारः युक्तः। अथापि **कपिञ्जलानालभेत** इत्यत्र यथा बहुवचने श्रुतेपि बहुत्वबोधकसंख्यासु त्रित्वसंख्याया एव प्रथमम् उपस्थितिः तस्य त्यागे मानाभावात् (प्रथमातिक्रमणे कारणाभावात्) त्रायाणाम् आलम्भनं कर्तव्यमिति निश्चीयते, तथा अत्र संख्यापदश्रवणात् प्रथमोपस्थितसंख्यायाः उपस्थितौ तस्याः त्यागे मानाभावात् सा संख्या एकत्वसंख्येत्यभिधीयते। अत एव प्रभाकाराः यथा कपिञ्जलानलभेत इति श्रौतवाक्ये प्रत्यासत्तिन्यायात् त्रित्वस्य भानम्, तथा वृत्तौ संख्यात्वेनैव एकत्वादिसंख्यानामुपस्थित्या उपस्थितसंख्यासु एकत्वस्यैव प्राथम्याद्भानमिति अलिखन्। एतत्सर्वं मनसि निधाय दीक्षितः अमुमर्थं कारिकारूपेण एवं प्रोवाच- तथा च

**अभेदैकत्वसंख्याया वृत्तौ भानमिति स्थितिः।**

**कपिञ्जलालम्भवाक्ये त्रित्वं न्यायाद्यथोच्यते।।**

एवञ्च अभेदैकत्वसंख्येत्युक्ते संख्याविशेषाणाम् अविभागेन अवस्थानमिति प्रकृतग्रन्थाशयः।

**अधिकरणसारः**

इदमधिकरणं एकादशाध्याये प्रथमपादे अष्टममधिकरणम्। अश्वमेधे **वसन्ताय कपिञ्जलानालभेत** इति वाक्येन वसन्तदेवतामुद्दिश्य बहुत्वावच्छिन्नकपिञ्जलालम्भनं विधीयते। बहुत्वं च त्रित्वचतुष्ट्वादिपरार्धपर्यन्तसंख्याव्यारकः धर्मविशेषः, न तु त्रित्वचतुष्ट्वाद्यन्यतमत्वम्। ततश्च तावतां प्राप्तौ समुच्चयेनानुष्ठानासंभवात् तद्याप्यसंख्यास्ववतरदालम्भनं त्रित्वचतुष्ट्वादिषु विश्राम्यतीति स्वेच्छया त्रयश्चत्वारः पञ्च वा इत्यनियतया आलब्धव्या इति पूर्वपक्षयित्वा यो हि चतुष्ट्वादिसंख्यामुपादत्ते, न तेन तदन्तर्भूतं त्रित्वं त्यक्तुं शक्यम्। त्रित्वमुपाददानेन तु अनन्तर्भूतं चतुष्ट्वादिकं वर्जयितुं शक्यम्। अतः अवश्यं भावित्वात् बहुत्वगणनायां प्रथमोपस्थितत्वाल्लाघवाच्च त्रय एव आलब्धव्या इति निर्णीय बहुत्वेन बहुवचनार्थ इति सिद्धान्तितम्। बहुत्वगणनायां त्रित्वस्य प्रथमोपस्थितत्वेन बहुवचनेन त्रित्वमेव यथा भासते तथा प्रकृतेपि विशेषसंख्याबोधकाभावस्थले एकत्वस्य सर्वतः प्रथमोपस्थितत्वात् तत्त्यागे मानाभावाच्च संख्यात्वेनैकत्वमेव प्रतीयते। विगलितविशेषधर्मस्यैकत्वस्यैव अभेदकत्वपदार्थात्।

**अत्र प्रथमपक्षः**

**संख्याविशेषाणामविभागेन सत्वमभेदैकत्वसंख्या**

संख्याविशेषाणाम्=एकत्व,द्वित्वादिसंख्याविशेषाणाम्, अविभागेन=संख्यात्वेन रूपेण, सत्वं = स्थितिः , अभेदैकत्वसंख्येत्यर्थः। अत्र विरोधपरिहारेण द्वित्वादिसंख्याः एकत्र वर्तन्ते इत्यत्र भर्तृहरिणा दृष्टान्तत्वेन कारिकैषा प्रदर्शिता।

**यथौषधिरसाः सर्वे मधुन्याहितशक्तयः।**
**अविभागेन वर्तन्ते तां संख्यां तादृशीं विदुः।।** (वाक्यपदीयम्-3.वृत्तिसमुद्देशः-100)

अविभागेन=अभेदेन, एकत्वसंख्या=एकत्वादिसंख्या इत्यर्थः। यथा मक्षिकाभिः सङ्गृहीते मधुनि सर्वे पुष्परसाः स्थापितनिजसूक्ष्मस्वरूपाः, भेदापरिचयेन वर्तन्ते तथा वृत्तौ उपसर्जनपदार्थगताम् अभेदैकत्वसंख्या-सामान्यरूपां संख्यां, सर्वसंख्याविशेषाविभागापन्नां विदुः इति कारिकार्थः। अयं भावः-यथा मधुनि विद्यमाना अपि तत्तत्पुष्परसास्तत्तद्रूपेण न प्रतीयन्ते किन्तु रसत्वेन तथा उपसर्जनपदार्थे सत्यपि एकत्वादिसंख्याः विशेषरूपेण न भासन्ते, किन्तु संख्यात्वेन भानम्। सति नमित्ते तत्तद्रूपेण प्रतीयन्ते। उदा-तावकः,शौर्पिरित्यादीनि। संख्यात्वेन रूपेण सर्वसंख्याभानमिति प्रथमपक्षतात्पर्यम्।

**प्रथमपक्षोदाहरणानि**

1.**पर्पादिभ्यः ष्ठन्** (पर्प इत्येवमादिभ्यः ष्ठन् प्रत्ययो भवति चरति इत्येतस्मिन्नर्थे इति सूत्रार्थः। अष्टाध्यायी-4-4-10) इति विहितः ष्ठन् उपसर्जनपदार्थे पर्पे द्वित्वं संख्याविशेषं नियमेन बोधयति। यतः एकेन काष्ठपीठेन पङ्गोश्चरणासम्भवात्। पर्पेण चरति, पर्पैः चरतीत्यर्थे वा रूपे भेदो न भवति, परं पङ्गोः न्यूनाधिक्ये गम्येते।

2.**शूर्पादञन्यतरस्याम्**(शूर्पशब्दादन्यतरस्यामञ् प्रत्ययो भवति आर्हीयेष्वर्थेषु इति सूत्रार्थः।अष्टाध्यायी-5-2-26)अनेन तृतीयान्तात् क्रीतमित्यर्थे ठक्, अञ् च यथाक्रमं विहितौ। शूर्पेण क्रीतः, शूर्पाभ्यां क्रीतः, शूर्पैः क्रीतः इत्यर्थेषु शौर्पम्, शौर्पिकम् इत्येव सिध्यतः। परमर्थभेदो दृश्यते। सर्वेषां संख्याविशेषाणां संख्यात्वेन तत्तदर्थविशेषाः भासन्ते।

**द्वितीयः पक्षः**

**परित्यक्तविशेषं वासंख्यासामान्यं तत्।**

परित्यक्ताः- केनापि कारणेनाज्ञाताः, विशेषाः=एकत्वत्वादिविशेषधर्मा यस्यैतादृशं यत्संख्यासामान्यं= सामान्यरूपा संख्या सैव च तत्=अभेदैकत्ववाच्य-मित्यक्षरार्थः।संख्यात्वेन रूपेण सर्वसंख्याभानमित्यर्थः प्रथमपक्षे। अस्मिन् द्वितीयपक्षे संख्यात्वेन संख्यासामान्यस्यैव भानं न विशेषस्येति पूर्वस्माद्विशेषः।मतद्वयेपि राजपुरुष इत्यत्र संख्यावद्राजसंबन्धीति बोधः।

उक्तं च वाक्यपदीये-

**भेदानां वा परित्यागात्संख्यात्मा स तथाविधः।**
**व्यापाराज्जातिभागस्य भेदापोहेन वर्तते।।**

(वाक्यपदीयम्-3.वृत्तिसमुद्देशः-101, परित्यक्तभेदा तान् भेदान् व्यावर्तयन्ती संख्याव्यपदेशमियमप्सादयति। तथा च तथाविधो अभेदैकत्वस्वभावोसौ संख्यात्मा व्यक्तितिरोभेदतिरोधेन जातिरूपाश्रयणे वर्तते। भेदापोहलक्षणं हि सर्वसंख्यानां जातिरूपमनुमानगतम्। पूर्वत्र समस्तभेदसंसर्गमात्रं समस्तभेदात्मकमभेदैकत्वमुक्तमितिभावः)

व्यक्तिरूपाणां संख्याविशेषाणां परित्यागात्, तथाविधः=अभेदैकत्वस्वभावः, सः=संख्यासामान्यरूपः, संख्यात्मा जातिभागस्य सामान्यरूपाभेदैकत्वस्य व्यापारात्, संख्याविशेषाणामन्यस्मात् व्यावर्तनरूपात्, भेदापोहेन=भेदानामेकत्वद्वित्वादीनां विशेषाणां निरासेन जातिरूपेण वर्तते इति कारिकार्थः। अयंभावः- वृत्तौ उपसर्जनपदार्थानामपि सत्वभूतत्वात् संख्यायोगावश्यकत्वेन विशेषसंख्याभावेन च सामान्यसंख्यारूपस्य समस्तसंख्याविशेषानुगतभेदापोहरूपस्याभेदैकत्वस्य भानात् राजपुरुष इत्यादौ मतद्वयेपि संख्यावान् राजपदार्थः इत्येतावत्प्रतीयते, न त्वव्ययार्थवदसंख्यो नापि घटादिवद्विशेषसंख्यावच्छिन्न इति। संख्यात्वेनैव एकत्वादिसंख्याप्रतीतेर्विशेषाणामेकत्र मधुनि संसर्गमिव उपसर्जनपदे सर्वसंख्याविशेषाणां संसर्गेणावस्थानरूपमभेदैकत्वम्। पक्षेस्मिन् संख्यात्वेन संख्याविशेषाणां भानं, मधुनि रसत्वेन रसविशेषाणां भानमिव। इदानीं तु सर्वसंख्याविशेषानुगतं भेदापोहरूपमभेदैकत्वमुक्तमिति पूर्वस्माद्विशेषः।अत्र पक्षे संख्यात्वेन रूपेण संख्यासामान्यस्यैव भानं न तु विशेषस्येति द्वितीयपक्षतात्पर्यम्। संख्यासामान्यस्यैव भानं न तु विशेषस्य इत्यत्र दृष्टान्ततया द्वे कारिके उदाहृते वाक्यपदीये-

**अगृहीतविशेषेण यथा रूपेण रूपवान्।**

**प्रख्यायते न शुक्लादिर्भेदापोहस्तु गम्यते।।** (वाक्यपदीयम्-3.वृत्तिसमुद्देशः-102)

**भेदरूपसमावेशे तथा सत्यविवक्षिते।**

**भागः प्रकाशितः कश्चिच्छास्त्रेऽङ्गत्वेन गृह्यते।। इति।** (वाक्यपदीयम्-3.वृत्तिसमुद्देशः-103)

अयमर्थः- यथा दूरात् कश्चन पार्थिवः पदार्थः अगृहीतशुक्लादिरूपाविशेषेण=रूपसामान्येन गृह्यमाणे रूपवान् प्रख्यायते, अस्ति किञ्चिद्रूपवद्रव्यमिति अवगम्यते, विशेषरूपन्तु शुक्लादि न गृह्यते, तथा वृत्तौ उपसर्जनपदार्थे संख्याविशेषरूपस्य एकत्वद्वित्वादिकस्य सम्बन्धे अविवक्षिते सति प्रकरणादिरूपनिमित्तवशात् कश्चनसंख्यासामान्यस्य एकत्वादिरूपसंख्याविशेषरूपो भागः प्रतीयते।

**द्वितीयपक्षोदाहरणानि**

**1.अप्सुयोनिः**-अप्सु योनिः उत्पत्तिः यस्य सः अप्सुयोनिः। प्रकृते **अपो योनियन्मतुषु**(शयवासवासिष्वकालात्-अष्टाध्यायी-6-3-18, इति सूत्रे वर्तते इदं वार्तिकम्, वा.सं-258)इति वार्तिकेन सप्तम्याः अलुक्। अत्र संख्या बहुवचनरूपा।

**2.सप्तम्यां जनेर्डः** इत्यनेन वर्षासु जात इत्यर्थे **हलदन्तात्सप्तम्याः संज्ञायाम्**(हलदन्तात् अदन्ताच्च सप्तम्या अलुक्संज्ञायामिति सूत्रार्थः। अष्टाध्यायी-6-3-9)इत्यनेन सप्तम्याः अलुक्। वर्षासु जातः। अत्रापि संख्या बहुवचनरूपा।

प्रथमपक्षे समस्तसंख्याविशेषे संसर्गिकरूपं समस्तसंख्याविशेषात्मकमभेदैकत्वमुक्तम्। द्वितीये तु समस्तसंख्याविशेषानुगतरूपमन्यापोहरूपम्। अभेदैकत्वरूपं हि सर्वसंख्यानां जातिरूपमनुगतं भवति। समस्तसंख्याविशेषरूपमभेदैकत्वमिति लभ्यते। एतावत्पर्यन्तं वाक्यपदीयोक्तपक्षत्रये पक्षद्वयं प्रदर्श्य तृतीयपक्षं परमसिद्धान्तत्वेनोपास्थापयति वस्तुतस्तु जिज्ञासैव नानुभवसिद्धा। तथात्वे वा ज्ञानेच्छयोः समानप्रकारकत्वेन हेतुहेतुमद्भावात्तत्तद्रूपेणैव वाच्यता स्यादिति ध्येयमि त्यादिना ग्रन्थेन।

**तस्यायमाशयः**

वृत्तौ संख्यासामान्यरूपाभेदैकत्वसंख्याप्रतीतौ साधकत्वेन या विविशेषजिज्ञासोक्ता सैवादौ नानुभवपथम् आरोहति। येन तदनुरोधेन वृत्तौ निरुक्ताभेदैकत्वसंख्याभानं परिकल्प्येत। लिङ्गसंख्यान्वितं द्रव्यमित्युक्तेः द्रव्यस्याव्यभिचारेण संख्यासहचरितत्वात् यत्र यत्र द्रव्यत्वं तत्र तत्र संख्यात्वमित्यानुमानिकसंख्या सामान्यज्ञानात् निरुक्तजिज्ञासायाः संभवात् तत्र च विशेषजिज्ञासायाः स्वरसतः सिद्धत्वाभावेन स्ववासनाकल्पितत्वात् विशेषजिज्ञासायां वृत्तिजन्यसामान्यज्ञानपूर्वकत्व-नियमाभावाच्च न तादृशजिज्ञासा अभेदैकत्वसंख्यायाः वृत्तिवाच्यत्वं कल्पयितुं प्रभवति।

**मूले तथात्वे वा इत्यादि ग्रन्थस्यायमर्थः**- पूर्वं जानाति, तत इच्छतीत्यनुभवादिच्छां प्रति ज्ञानं कारणं, तज्ज्ञानं विना तदिच्छायाः असंभवात्। तत्रापि ज्ञायमानं ज्ञानं यद्धर्मप्रकारकं यद्विशेष्यकं च भवति

तद्धर्मप्रकारिकां तद्विशेष्यिकामेवेच्छां जनयति। एवं यद्धर्मप्रकारिका यद्विशेष्यिका इच्छा भवति तद्धर्मप्रकारकं तद्विशेष्यकमेव ज्ञानं तादृशेच्छाकारणं भवति। यथा सुखत्वप्रकारिकायाः सुखविशेष्यिकायाः इच्छायाः सुखत्वप्रकारकं सुखविशेष्यकं ज्ञानं कारणमित्येवं ज्ञानेच्छयोः समानप्रकारकत्वेन हेतुहेतुमद्भावस्य दृष्टत्वेन प्रकृतस्थले एकत्वत्वादिविशेषधर्मप्रकारकजजिज्ञासायाः कारणीभूतज्ञानेपि एकत्वत्वादि विशेषधर्मप्रकारकत्वस्य अवश्याङ्गीकर्तव्यतया वृत्तौ उपसर्जनपदादेव एकत्वत्वादिविशेषधर्मावगतौ सत्यां तादृशजिज्ञासोदयात् अत्यन्तासंभवात् विशेषजिज्ञासाभूतस्य सामान्यज्ञानस्य नष्टत्वात् तदवलम्बिनी विशेषजिज्ञासापि विनष्टेति वृद्धिमिच्छतो मूलमपि ते नष्टमिति न्यायानुकारि वृत्तावुपसर्जनपदात् संख्यात्वेन संख्यप्रतीतिकल्पनमित्यर्थः। ज्ञानेच्छयोः समानप्रकारकत्वेन कार्यकारणनियमानुभवात् वृत्तावेकत्वत्वादितत्तत् विशेषरूपेणैव संख्याया वाच्यत्वस्य वक्तव्यत्वात् वृत्तौ उपसर्जनपदात् संख्यात्वेन सामन्यसंख्याप्रतीतिः सुतरां कल्पयितुं दुश्शकेति परमार्थः। तस्मात् संख्याविशेषानवगतिरेव अभेदैकत्वसंख्या। अभेदैकत्वसंख्येत्यस्य भेदसहचरितैकत्वादिसंख्याविशेषस्य अभानमित्यर्थः, न तु अभेदैकत्वसंख्याशब्दवाच्यमन्यत् किंचित् संख्यासामान्यमस्ति। एवञ्च वृत्तौ उपसर्जनपदात् संख्यासामान्यप्रतीतिरपि नास्तीति सुस्पष्टम्।

❀❀❀❀❀❀❀❀❀❀❀

SRI CHANDRASEKHARENDRA SARASWATHI VISWA MAHAVIDYALAYA KANCHEEPURAM SCSVMV